# श्रीकुंजबिहारी अष्टक

यः स्तूयते श्रुतिगणैर्निपुणैरजस्रं, सम्पूज्यते क्रतुगतैः प्रणतैः क्रियाभिः।
तं सर्वकर्मफ़लदं निजसेवकानां, श्रीमद् विहारिचरणं शरणं प्रपद्ये॥१॥

यं मानसे सुमतयो यतयो निधाय, सद्यो जहुः सहृदया हृदयान्धकारम्।
तं चन्द्रमण्डल-नखावलि-दीप्यमानं, श्री मद् विहारिचरणं शरणं प्रपद्ये॥२॥

येन क्षणेन समकारि विपद्वियोगो, ध्यानास्पदं सुगमितेन नुतेन विज्ञैः।
तं तापवारण-निवारण-सांकुशांकं, श्री मद् विहारिचरणं शरणं प्रपद्ये॥३॥

यस्मै विधाय विधिना विधिनारदाद्याः, पूजां विवेकवरदां वरदास्यभावाः।
तं दाक्षलक्षण-विलक्षण-लक्षणाढ्यं, श्री मद् विहारिचरणं शरणं प्रपद्ये॥४॥

यस्मात् सुखैकसदनान्मदनारिमुख्याः, सिद्धि समीयुरतुलां सकलांगशोभाम्।
तं शुद्धबुद्धि-शुभवृद्धि-समृद्धि-हेतुं, श्री मद् विहारिचरणं शरणं प्रपद्ये॥५॥

यस्य प्रपन्नवरदस्य प्रसादतः स्यात्, तापत्रयापहरणं शरणं गतानाम्।
तं नीलनीरजनिभं जनिभंजनाय, श्री मद् विहारिचरणं शरणं प्रपद्ये॥॥६॥

यस्मिन् मनो विनिहितं भवति प्रसन्नं, खिन्नं कदिन्द्रियगणैरपि यद्विषण्यम्।
तं वास्तव-स्तव-निरस्त-समस्त दुखं, श्री मद् विहारिचरणं शरणं प्रपद्ये॥७॥

हे कृष्णपाद! शमितार्ति-विषादभक्त-वांछा-प्रदामर-महीरूह-पंचशाख।
संसार-सागर-समुत्तरणे वहित्र, हे चिह्न-चित्रितचरित्र नमो नमस्ते॥८॥

इदं विष्णोः पादाष्टकमतिविशादाभिशमनम्, प्रणीतं यत्प्रेरणा सुकवि-जगदीशेन विदुषा।
पठेदयो वा भक्तयाऽच्युति-चरण-चेताः स मनुजो, भवे भुक्त्वा भोगानभिसरति चान्ते हरिपदम्॥९॥


*******************************************************************************
**website : www.bankeybihari.info & www.brajdarshan.info**
**Phone : +91-9897919717 , 9897233358**
*******************************************************************************